"नाकामयत तं दातुं वरं दाशाय शान्तनुः।
शरीरजेन तीव्रेण दह्यमानोऽपि भारत॥")
पुत्रः। इति धरणिः। (यथा, महाभारते।
१३।२४।४।
"इति पृष्टो मया राजन् पराशरशरीरजः।
अब्रवीन्निपुणो धर्म्मे निःसंशयमनुत्तमम्॥")
देहजाते, त्रि। यथा,—
"शरीरजैः कर्म्मदोषैर्य्याति स्थावरतां नरः।
वाचिकैः पक्षिमृगतां मानसैरन्त्यजातिताम्॥"
इति प्रायश्चित्ततत्त्वम्॥

**शरीरसंस्कारः**, पुं, (शरीरस्य संस्कारः।) देह-संस्कारकर्म्म। शरीरस्य शोभनं मार्ज्जनञ्च॥

**शरीरावरणं**, क्ली, (शरीरस्य आवरणम्।) चर्म्म। इति राजनिर्घण्टः॥ कायवेष्टनञ्च॥ (वर्म्म। यथा, महाभारते।७।१८५।४०।
"विचित्रैर्विविधाकारैः शरीरावरणैरपि।
विचित्रैश्च रथैर्भग्नैर्हतैश्च गजवाजिभिः॥")

**शरीरी** [न्] पुं, (शरीरमस्यास्तीति। शरीर+इनिः।) शरीरविशिष्टः। तत्पर्य्यायः।
"भवोद्भवौ च प्राणी तु शरीरिजन्तुजन्तवः।
प्राणश्चेतनो जन्मी चित्तन्तु हृदयं मनः॥"
इति जटाधरः॥
शरीरिलक्षणं यथा,—
"गर्भाशयगतं शुक्रमार्त्तवं जीवसंज्ञकः।
प्रकृतिः सविकारा च तत् सर्व्वं गर्भसंज्ञकम्॥
कालेन वर्द्धितो गर्भो यदाङ्गोपाङ्गसंयुतः।
भवेत्तदा स मुनिभिः शरीरीति निगद्यते॥"
अङ्गोपाङ्गसंयुतः व्यक्ताङ्गोपाङ्गः।
"तस्य त्वङ्गान्युपाङ्गानि ज्ञात्वा सुश्रुतशास्त्रतः।
मस्तकादभिधीयन्ते शिष्याः शृणुत यत्नतः॥
आद्यमङ्गं शिरः प्रोक्तं तदुपाङ्गानि कुन्तलाः।
तस्यान्तर्मस्तुलुङ्गञ्च ललाटभ्रूयुगं तथा॥
नेत्रद्वयं तयोरन्तर्वर्त्तिते द्वे कनीनिके।
दृष्टिद्वयं कृष्णगोलौ श्वेतभागौ च वर्त्मनि॥
पक्ष्माण्यपाङ्गौ शङ्खौ च कर्णौ तच्छष्कुलीद्वयम्।
पालिद्वयं कपोलौ च नासिका च प्रकीर्त्तिता॥
ओष्ठाधरौ च सृक्कण्यौ मुखं तालु हनुद्वयम्।
दन्ताश्च दन्तवेष्टाश्च रसना चिबुकं गलः॥
द्वितीयमङ्गं ग्रीवा तु यया मूर्द्धा विधार्य्यते।
तृतीयं बाहुयुगलं तदुपाङ्गान्यथो ब्रुवे॥
तस्योपरि मतौ स्कन्धौ प्रगण्डौ भवतस्त्वधः।
कफोणियुग्मं तदधः प्रकोष्ठयुगलं तथा॥
मणिबन्धौ तले हस्तौ तयोश्चाङ्गुलयो दश।
नखाश्च दश ते ख्याप्या दश छेद्याः प्रकीर्त्तिताः॥
चतुर्थमङ्गं वक्षस्तु तदुपाङ्गान्यथ ब्रुवे।
स्तनौ पुंसस्तथा नार्य्या विशेष उभयोरयम्॥
यौवनागमने नार्य्याः पीवरौ भवतः स्तनौ।
गर्भवत्याः प्रसूतायास्तावेतौ क्षीरपूरितौ॥
हृदयं पुण्डरीकेण सदृशं स्यादधोमुखम्।
जाग्रतस्तद्विकसति स्वपतस्तु निमीलति॥
आशयस्तत्तु जीवस्य चेतनास्थानमुत्तमम्।
अतस्तस्मिंस्तमोव्याप्ते प्राणिनः प्रस्वपन्ति हि॥"
चेतनास्थानमुत्तममिति अयमभिप्रायः।
"चेतनानामधिष्ठानं मनो देहश्च सेन्द्रियः।
केशलोमनखाग्रान्तमलं द्रव्यगुणैर्विना॥"
इत्युक्तवता चरकेण सकलं शरीरं चेतनास्थान-मुक्तं तदपेक्षया हृदयं विशेषतश्चेतनावस्थान-मिति।
"कक्षयोर्व्वक्षसोः सन्धी जत्रुणी समुदाहृते।
कक्षे उभे समाख्याते तयोः स्याताञ्च वंक्षणौ॥
उदरं पञ्चमं भागं षष्ठं पार्श्वद्वयं मतम्।
सपृष्ठवंशं पृष्ठन्तु समस्तं सप्तमं स्मृतम्॥*॥
उपाङ्गानि च कथ्यन्ते तानि जानीहि यत्नतः॥
शोणिताज्जायते प्लीहा वामतो हृदयादधः।
रक्तवाहिशिराणां स मूलं ख्यातो महर्षिभिः॥
हृदयाद्वामतोऽधश्च फुप्फुसो रक्तफेनजः।
अधो दक्षिणतश्चापि हृदयाद्यकृतः स्थितिः॥
तत्तु रञ्जकपित्तस्य स्थानं शोणितजं मतम्।
अधस्तु दक्षिणे भागे हृदयात् क्लोम तिष्ठति।
जलवाहिशिरामूलं तृष्णाच्छादनकृन्मतम्॥"
क्लोम तिलकं एतत्तु वातरक्तजम्। अत्राह च वृद्धवाग्भटः।
"रक्तादनिलसंयुक्तात् कालीयक समुद्भवः।"
इति।
"मेदःशोणितयोः साराद्वृक्कयोर्युगलं भवेत्।
तौ तु पुष्टिकरौ प्रोक्तौ जठरस्थस्य मेदसः॥
उक्ताः सार्द्धास्त्रयो व्यामाः पुंसामन्त्राणि सूरिभिः।
अर्द्धव्यामेन हीनानि योषितोऽन्त्राणि निर्द्दिशेत्॥
उण्डुकञ्च कटी चापि त्रिकं वस्तिश्च वंक्षणौ।
कन्दराणां प्ररोहः स्यान्मेढ्राणां वीर्य्यमूत्रयोः।
स एव गर्भस्याधानं कुर्य्याद्गर्भाशये स्त्रियाः॥
शङ्खनाभ्याकृतिर्योनिस्त्र्यावर्त्ता सा च कीर्त्तिता।
तस्यास्तृतीये त्वावर्त्ते गर्भशय्या प्रतिष्ठिता॥
वृषणौ भवतः सारात् कफासृङ्मांसमेदसाम्।
वीर्य्यवाहिशिराधारौ तौ मतौ पौरुषावहौ॥
गुदस्य मानं सर्व्वस्य सर्व्वं स्याच्चतुरङ्गुलम्।
तत्र स्युर्व्वलयस्तिस्रः शङ्खावर्त्तनिभास्तु ताः॥
प्रवाहिणी भवेत् पूर्व्वा सार्द्धाङ्गुलमिता मता।
उत्सर्ज्जिनी तु तदधः सा सार्द्धाङ्गुलसम्मिता॥
तस्या अधःसम्वरणी स्यादेकाङ्गुलसम्मिता।
अर्द्धाङ्गुलप्रमाणन्तु बुधैर्गुदमुखं मतम्॥
मलोत्सर्गस्य मार्गोऽयं पायुर्देहे विनिर्मितः।
पुंसः प्रोथौ स्मृतौ यौ तु तौ नितम्बौ च योषितः॥
तयोः कुकुन्दरे स्यातां सक्थिनी त्वङ्गमष्टमम्।
तदुपाङ्गानि च ब्रूमो जानुनी पिण्डिकाद्वयम्॥
जङ्घे द्वे घुटिके पार्ष्णी तले च प्रपदे तथा।
पादावङ्गुलयस्तत्र दश तासां नखा दश॥"
इति भावप्रकाशः॥
(क्षेत्रज्ञो जीवात्मा। यथा, मनुः।१।५३।
"तस्मिन् स्वपिति तु स्वस्थे कर्म्मात्मानः शरीरिणः।
स्वकर्म्मभ्यो निवर्त्तन्ते मनश्च ग्लानिमृच्छति॥")

**शरुः**, पुं, (शॄ हिंसायाम्+"शॄस्वृस्निहित्रप्य-सौति।"उणा०१।११। इति उः।) क्रोधः। वज्रम्। इति मेदिनी॥ बाणः। इति हेम-चन्द्रः॥ आयुधम्। इति सिद्धान्तकौमुद्या-मुणादिवृत्तिः॥ (हिंसा। यथा, ऋग्वेदे।६।२७।६।
"वृचीवन्तः शरवे पत्यमानाः।"
"शरवे हिंसायै।" इति तद्भाष्ये सायणः॥ गन्धर्व्वविशेषः। यथा, महाभारते।१।१२३।५५।
"विश्वावसुर्भुमन्युश्च सुचन्द्रश्च शरुस्तथा॥"
हिंसके, त्रि। यथा, तत्रैव।७।७१।१।
"दिवा नक्तं शरुमस्मद्युयोतम्॥"
"शरुं हिंसकम्।" इति तद्भाष्ये सायणः॥)

**शरेष्टः**, पुं, आम्रः। इति जटाधरः॥

**शर्करकः**, पुं, (शर्कर+"वुञ्छण्कठेति।"४।२।८०। इत्यनेन कः।) मधुरजम्बीरः। इति राजनिर्घण्टः॥

**शर्करजा**, स्त्री, (शर्कराज्जायते इति। जन+डः। स्त्रियां टाप्।) सिताखण्डः। इति राज-निर्घण्टः॥

**शर्करा**, स्त्री, खण्डविकृतिः। चिनी इति भाषा। तत्पर्य्यायः। सिता २। इत्यमरः॥ शुक्लोपला ३ शुक्ला ४ सितोपला ५। इति रत्नमाला॥ मीनाण्डी ६ श्वेता ७ मत्स्यण्डिका ८ अहि-च्छत्रा ९ सुसिकता १० गुडोद्भवा ११। अस्या गुणाः। मधुरत्वम्। शीतत्वम्। पित्तदाह-श्रमरक्तदोषभ्रान्तिक्रमिकोपनाशित्वञ्च। इति साधारणशर्करागुणाः॥*॥
अथ शर्कराविशेषगुणाः।
"स्निग्धा पुण्ड्रकशर्करा हितकरी क्षीणे क्षयेऽरोचके
चक्षुष्या बलवर्द्धनी सुमधुरा वृष्या च वंशेक्षुजा।
तृष्णा तृप्तिबलप्रदा श्रमहरा श्यामेक्षुजा शीतला
स्निग्धा कान्तिकरी रसालजनिता रक्तेक्षुजा पित्तजित्॥"
इति पञ्चेक्षुशर्करागुणाः॥*॥
"यावनाली हिमोत्पन्ना हिमाली हिमशर्करा।
क्षुद्रशर्करिका क्षुद्रा गुडजा जलबिन्दुजा॥
हिमजा शर्करा गौल्या सोक्ता तिक्तातिपिच्छिला।
वातघ्नी सारिका वृष्या दाहपित्तास्रदायिनी॥"
इति यावनालशर्करागुणाः॥*॥
"शीतजाख्या कर्करजा माधवी मधुशर्करा।
माक्षिका शर्करा प्रोक्ता सिताखण्डश्च खण्डकः॥
सिताखण्डोऽतिमधुरश्चक्षुष्यश्छर्द्दिनाशनः।
कुष्ठव्रणकफश्वासहिक्कापित्तास्रदोषनुत्॥
यवासशर्करा त्वन्या सुधामोदकमोदकः।
तवराजः खण्डसारः खण्डजा खण्डमोदकः॥"
इति राजनिर्घण्टः।"*॥